| अथोपपातकानि। | प्रायश्चित्तानि। | तदशक्तौ धेनुदानम्। | तदशक्तौ चूर्णीदानम्। | दक्षिणा |
|---|---|---|---|---|
| अपरस्य। संघातान्नम्। शूद्रोपनीतान्नम्। पतितोपनीतान्नम्। शूद्रवेश्मस्थान्नञ्च। | | | | |
| शूद्रस्य पक्वान्नभक्षणम्। | ब्राह्मणस्य त्र्यहोपवासः। एतदज्ञानतः। | १ धेनुः। अर्द्धधेन्वसम्भवात्। | १॥कार्षापणः। | यथाशक्ति। |
| | ज्ञानतः प्राजापत्यम्। आपदि भक्षणे मनस्तापः द्रुपदां शतजपो वा। क्षत्रियादीनां पादपादहानिः। | १ धेनुः। | ३ कार्षापणाः। | यथाशक्ति। |
| अभ्यासात् शूद्रस्य पक्वान्नभक्षणम् | ब्राह्मणस्य मासयावकपानम्। क्षत्रियादीनां पादपादहानिः। | २धेनू। | ६ कार्षापणाः। | यथाशक्ति। |
| शूद्रस्यामान्नभक्षणम्। | उक्तप्रायश्चित्ततुरीयभागः। आपदि भक्षणे प्रायश्चित्ताभावः। | | | |
| अथ रजकशैलूषवेणुचर्मोपजीविकैवर्त्ताद्यन्त्यजान्नभक्षणम्। | चान्द्रायणम्। एतत् ज्ञानाभ्यासविषयम्। अज्ञाने त्वर्द्धम्। | ८ धेनवः सार्द्धसप्तधेन्वसम्भवात् | २२॥० कार्षापणाः। | यथाशक्ति। |
| | ज्ञानतोऽष्टधाभ्यासे कृच्छ्राब्दव्रतम्। | ३० धेनवः। | ९०कार्षापणाः। | १७ गावः। अशक्तौ १६॥/१६॥ कार्षापणाः। |
| | अज्ञानतोऽष्टधाभ्यासे एतदर्द्धम्। एतत्तु ब्राह्मणविषयम्। क्षत्रियादीनां पादपादहानिः। | १५ धेनवः। | ४५कार्षापणाः। | ९ गावः। अशक्तौ ८।/८॥ कार्षापणाः। |
| सकृदज्ञानकृतान्त्यजोत्सृष्टाशनम्। | ब्राह्मणस्य चान्द्रायणम्। | ८ धेनवः। | २२॥०कार्षापणाः | यथाशक्ति। |
| | क्षत्रियस्य तप्तकृच्छ्रम्। | ४ धेनवः। | १२ कार्षापणाः। | यथाशक्ति। |
| | वैश्यस्य तप्तकृच्छ्रार्द्धम्। | २ धेनू। | ६ कार्षापणाः। | यथाशक्ति। |
| | शूद्रस्य तप्तकृच्छ्रपादः। | १धेनुः। | ३ कार्षापणाः। | यथाशक्ति। |
| | ज्ञानत एतद्द्विगुणम्। | | | |
| कापालिकान्नभक्षणम्। | ज्ञानात् कृच्छ्राब्दम्। | ३० धेनवः। | ९० कार्षापणाः। | १७ गावः। अशक्तौ १६॥/१६॥ कार्षापणाः। |
| | अज्ञानात् चान्द्रायणद्वयम्। एतदष्टधाभ्यासविषयम्। एतत् सर्व्वं ब्राह्मणस्य। क्षत्रियादौ पादपादहानिः। | १५ धेनवः। | ४५ कार्षापणाः। | यथाशक्ति। |
| चाण्डालश्वपचक्षत्तृसूतवैदेहकमागधायोगवानामन्त्यावसायिनामन्नभक्षणम्। | ब्राह्मणस्य कामतः सकृद्भोजने चान्द्रायणम्। | ८ धेनवः। | २२॥० कार्षापणाः। | यथाशक्ति। |
| | अज्ञानतस्तप्तकृच्छ्रम्। | ४ धेनवः। | १२ कार्षापणाः। | यथाशक्ति। |
| | बलाद्भोजने पराकः। | ५ धेनवः। | १५ कार्षापणाः। | यथाशक्ति। |
| | अज्ञानतोऽष्टचत्वारिंशद्वारभोजने द्वादशवार्षिकव्रतम्। ज्ञानतश्चतुर्विंशतिवारभोजने एतदेव। | १८० धेनवः। | ५४० कार्षापणाः। | १०० गावः। अशक्तौ १०० कार्षापणाः। |
| | ज्ञानतोऽष्टचत्वारिंशद्वारभोजने चतुर्व्विंशतिवार्षिकव्रतं अव्यवहार्य्यता च। | ३६० धेनवः। | १०८० कार्षापणाः। | २०० गावः। अशक्तौ २०० कार्षापणाः। |
| | सकृत्ज्ञानत आमान्नभोजने त्रिरात्रोपवासः। सर्व्वत्र क्षत्रियादीनां पादपादहानिः। | | १॥० कार्षापणः। | यथाशक्ति। |
| | आपदि पक्वान्नभोजने क्षत्रियस्यसान्तपनम् | २ धेनू। | ६ कार्षापणाः। | यथाशक्ति। |
| | वैश्यस्य षड्रात्रम्। | १ धेनुः। | ३ कार्षापणाः। | यथाशक्ति। |
| | शूद्रस्य त्रिरात्रम्। | ० | १॥०कार्षापणः। | यथाशक्ति। |
| चाण्डालपतितादीनामुत्सृष्टान्नभक्षणम्। | द्विजस्य पराकः। | ५ धेनवः। | १५कार्षापणाः। | यथाशक्ति। |
| | शूद्रस्य कृच्छ्रम्। | १ धेनुः। | ३ कार्षापणाः। | यथाशक्ति। |
| | एतत् सकृदज्ञानविषयं ज्ञानतो द्विगुणादिकम्। | | | |